श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ पञ्चसूक्तानि ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

# विषयसूची


1 पुरुषसूक्तम् .......... 2

2 नारायणसूक्तम् .......... 8

3 विष्णुसूक्तम् .......... 10

4 श्रीसूक्तम् .......... 13

5 भूसूक्तम् .......... 17

6 नीळासूक्तम् .......... 19

**श्रीः**

**श्रीमते रामानुजाय नमः**

**श्रीमते निगमान्तमहादेशिकाय नमः**

# ॥ पुरुषसूक्तम् ॥

॥ हरिः ओ(४)म् ॥

स॒हस्र॑ शीर्‌षा॒ पुरु॑षः।

स॒ह॒स्रा॒क्षः स॒हस्र॑पात्।

स भूमिं॑ वि॒श्वतो॑ वृ॒त्वा।

अत्य॑तिष्ठद्दशाङ्गु॒लम्।

पुरु॑ष ए॒वेदग्ं सर्व᳚म्।

यद्भू॒तं यच्च॒ भव्य᳚म्।

उ॒तामृ॑त॒त्वस्येशा॑नः।

यदन्ने॑नाति॒रोह॑ति।

ए॒तावा॑नस्य महि॒मा।

अतो॒ ज्याया॑ग्‌श्च॒ पूरु॑षः ॥ **1** ॥

पादो᳚ऽस्य॒ विश्वा॑ भू॒तानि॑।

त्रि॒पाद॑स्या॒मृतं॑ दि॒वि।

त्रि॒पादू॒र्ध्व उदै॒त्पुरु॑षः।

पादो᳚ऽस्ये॒हाभ॑वा॒त्पुनः॑।

ततो॒ विष्व॒ङ्व्य॑क्रामत्।

सा॒श॒ना॒न॒श॒ने अ॒भि।
तस्मा᳚द्वि॒राड॑जायत।
वि॒राजो॒ अधि॒ पूरु॑षः।
स जा॒तो अत्य॑रिच्यत।
प॒श्चाद्भूमि॒मथो॑ पु॒रः॥ **2**॥

यत्पुरु॑षेण ह॒विषा᳚।
दे॒वा य॒ज्ञमत॑न्वत।
व॒स॒न्तो अ॑स्यासी॒दाज्य᳚म्।
ग्री॒ष्म इ॒ध्मश्श॒रद्ध॒विः।
स॒प्तास्या॑सन्परि॒धय॑ः।
त्रिस्स॒प्त स॒मिध॑ः कृ॒ताः।
दे॒वा यद्य॒ज्ञं त॑न्वा॒नाः।
अब॑ध्न॒न्पुरु॑षं प॒शुम्।
तं य॒ज्ञं ब॒र्॒हिषि॒ प्रौक्ष॑न्।
पुरु॑षं जा॒तम॑ग्र॒तः॥ **3**॥

तेन॑ दे॒वा अय॑जन्त।
सा॒ध्या ऋष॑यश्च॒ ये।
तस्मा᳚द्य॒ज्ञाथ्स॑र्व॒हुत॑ः।
सम्भृ॑तं पृषदा॒ज्यम्।
प॒शूग्॒स्ताग्श्च॑क्रे वाय॒व्यान्॑।

आ॒र॒ण्यान्ग्रा॒म्याश्च॒ ये।
तस्मा॑द्य॒ज्ञात्स॑र्व॒हुत॑ः।
ऋच॒स्सामा॑नि जज्ञिरे।
छन्दा॑ग्ँसि जज्ञिरे॒ तस्मा॑त्।
यजु॒स्तस्मा॑दजायत॥ **4**॥

तस्मा॒दश्वा॑ अजायन्त।
ये के चो॑भ॒याद॑तः।
गावो॑ ह जज्ञिरे॒ तस्मा॑त्।
तस्मा॑ज्जा॒ता अ॑जा॒वय॑ः।
यत्पुरु॑षं॒ व्य॑दधुः।
क॒ति॒धा व्य॑कल्पयन्।
मुखं॒ किम॑स्य॒ कौ बा॒हू।
कावू॒रू पादा॑वुच्येते।
ब्रा॒ह्म॒णो॑ऽस्य॒ मुख॑मासीत्।
बा॒हू रा॑ज॒न्य॑ः कृ॒तः॥ **5**॥

ऊ॒रू तद॑स्य॒ यद्वैश्य॑ः।
प॒द्भ्यां शू॒द्रो अ॑जायत।
च॒न्द्रमा॒ मन॑सो जा॒तः।
चक्षो॒स्सूर्यो॑ अजायत।
मुखा॒दिन्द्र॑श्चा॒ग्निश्च॑।

प्रा॒णाद्वा॒युर॑जायत।
नाभ्या॑ आसीद॒न्तरि॑क्षम्।
शी॒र्ष्णो द्यौस्सम॑वर्तत।
प॒द्भ्यां भूमि॒र्दिश॒श्श्रोत्राँ॑त्।
तथा॑ लो॒काग्ं अ॑कल्पयन्॥ **6**॥

वेदा॒हमे॒तं पुरु॑षं म॒हान्त॓म्।
आ॒दि॒त्यव॑र्णं॒ तम॑स॒स्तु पा॒रे।
सर्वा॑णि रू॒पाणि॑ वि॒चित्य॒ धीरः॑।
नामा॑नि कृ॒त्वाऽभि॒वद॒न् यदास्ते॓।
धा॒ता पु॒रस्ता॒द्यमु॑दाज॒हार॑।
श॒क्रः प्रवि॒द्वान्प्र॒दिश॒श्चत॑स्रः।
तमे॒वं वि॒द्वान॒मृत॑ इ॒ह भ॑वति।
नान्यः पन्था॒ अय॑नाय विद्यते।
य॒ज्ञेन॑ य॒ज्ञम॑यजन्त दे॒वाः।
तानि॒ धर्मा॑णि प्रथ॒मान्या॑सन्।
ते ह॒ नाक॓ं महि॒मान॑स्सचन्ते।
यत्र॒ पूर्वे॑ सा॒ध्यास्सन्ति॑ दे॒वाः॥ **7**॥

अ॒द्भ्यस्सम्भू॑तः पृथि॒व्यै रसा॓च्च।
वि॒श्वक॑र्मण॒स्सम॑वर्त॒ताधि॑।
तस्य॒ त्वष्टा॑ वि॒दध॑द्रू॒पमे॑ति।

तत्पुरुषस्य विश्वमाजानमग्रे।
वेदाहमेतं पुरुषं महान्तम्।
आदित्यवर्णं तमसः परस्तात्।
तमेवं विद्वानमृत इह भवति।
नान्यः पन्था विद्यतेऽयनाय।
प्रजापतिश्चरति गर्भे अन्तः।
अजायमानो बहुधा विजायते॥ **8**॥

तस्य धीराः परिजानन्ति योनिम्।
मरीचीनां पदमिच्छन्ति वेधसः।
यो देवेभ्य आतपति।
यो देवानां पुरोहितः।
पूर्वो यो देवेभ्यो जातः।
नमो रुचाय ब्राह्मये।
रुचं ब्राह्मं जनयन्तः।
देवा अग्रे तदब्रुवन्।
यस्त्वैवं ब्राह्मणो विद्यात्।
तस्य देवा असन्वशे॥ **9**॥

ह्रीश्च ते लक्ष्मीश्च पत्न्यौ।
अहोरात्रे पार्श्वे।
नक्षत्राणि रूपम्।

अ॒श्विनौ॒ व्यात्त॑म्।
इ॒ष्टं म॑निषाण।
अ॒मुं म॑निषाण।
सर्वं॑ मनिषाण॥ **10**॥

॥ इति पुरुषसूक्तं समाप्तम्॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥नारायणसूक्तम्॥

स॒ह॒स्र॒शीर्॑षं दे॒वं॒ वि॒श्वाक्षं॑ वि॒श्वश॑म्भुवम्।
विश्वं॑ ना॒राय॑णं दे॒व॒म॒क्षरं॑ प॒रमं प्र॒भुम्।
वि॒श्वतः॒ पर॑मं नि॒त्यं॒ वि॒श्वं ना॑राय॒णग्ं॒ ह॑रिम्।
विश्व॑मे॒वेदं पुरु॑ष॒स्तद्विश्व॒मुप॑जीवति।
पतिं॒ विश्व॑स्या॒त्मेश्व॑र॒ग्ं॒ शाश्व॑तग्ं शि॒वम॑च्युतम्।
ना॒राय॒णं म॑हाज्ञे॒यं॒ वि॒श्वात्मा॑नं प॒राय॑णम्।
[ना॒रा॑य॒णं म॑हाज्ञे॒यं॒ वि॒श्वात्मा॑नं प॒राय॑णम्।]
ना॒राय॒णप॑रं ब्र॒ह्म॒ त॒त्वं ना॑राय॒णः प॑रः।
[ना॒रा॑य॒णप॑रं ब्र॒ह्म॒ त॒त्त्वं ना॑राय॒णः प॑रः।]
ना॒राय॒ण प॑रो ज्यो॒ति॒रा॒त्मा ना॑राय॒णः प॑रः।
[ना॒रा॑य॒णप॑रो ज्यो॒ति॒रा॒त्मा ना॑राय॒णः प॑रः।]
यच्च॑ कि॒ञ्चिज्जग॑त्य॒स्मि॒न्दृ॒श्यते᳚ श्रूय॒तेऽपि॑ वा॥ **1**॥

अन्त॑र्ब॒हिश्च॑ तत्स॒र्वं॒ व्या॒प्य ना॑राय॒णः स्थि॑तः।
अन॑न्त॒मव्य॑यं क॒विग्ं स॑मु॒द्रेऽन्तं॑ वि॒श्वश॑म्भुवम्।
प॒द्म॒को॒श॒प्र॑तीका॒श॒ग्ं॒ हृ॒दयं॑ चाप्य॒धोमु॑खम्।
अधो॑ नि॒ष्ट्या वि॑तस्त्यां॒ तु॒ ना॒भ्यामु॑परि॒ तिष्ठ॑ति।
हृ॒दयं॑ तद्वि॑जानीया॒द्वि॒श्वस्याय॑त॒नं म॑हत्।

सन्ततं सिराभिस्तु लम्बत्या कोशसन्निभम्।
तस्यान्ते सुषिरं सूक्ष्मं तस्मिन्थ्सर्वं प्रतिष्ठितम्।
तस्य मध्ये महानग्निर्विश्वार्चिर्विश्वतोमुखः॥ 2॥

सोऽग्रभुग्विभजन्तिष्ठन्नाहारमजरः कविः।
सन्तापयति स्वं देहमापादतलमस्तकम्।
[सन्तापयति स्वं देहमापादतलमस्तकम्।]
तस्य मध्ये वह्निशिखा अणीयोर्ध्वा व्यवस्थितः।
नीलतोयदमध्यस्था विद्युल्लेखेव भास्वरा।
नीवारशूकवत्तन्वी पीताभास्यात्तनूपमा।
[नीवारशूकवत्तन्वी पीताभास्यात्तनूपमा।]
तस्याश्शिखाया मध्ये परमात्मा व्यवस्थितः।
स ब्रह्मा स शिवस्सेन्द्रस्सोऽक्षरः परमस्स्वराट्॥ 3॥

ऋतं सत्यं परंब्रह्म पुरुषं कृष्णपिङ्गळम्।
ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमः॥ 4॥

ओं नारायणाय विद्महे वासुदेवाय धीमहि।
तन्नो विष्णुः प्रचोदयात्॥ 4॥

॥ इति नारायणसूक्तं समाप्तम्॥

**श्रीः**

**श्रीमते रामानुजाय नमः**

**श्रीमते निगमान्तमहादेशिकाय नमः**

# ॥ विष्णुसूक्तम् ॥

विष्णो॒र्नुकं॑ वी॒र्या॑णि॒ प्रवो॑चं॒ यः पार्थि॑वानि विम॒मे
रजाग्ं॑सि॒ यो अस्क॑भाय॒दुत्त॑रग्ं स॒धस्थं॑
विचक्रमा॒णस्त्रे॒धोरु॑गा॒यो विष्णो॑र॒राट॑मसि॒
विष्णोः᳚ पृ॒ष्ठम॑सि॒ विष्णो॒श्श्नप्त्रे᳚स्थो॒
विष्णो॒स्स्यूर॑सि॒ विष्णो᳚र्ध्रु॒वम॑सि
वैष्ण॒वम॑सि॒ विष्ण॑वे त्वा॥ **1**॥

तद॑स्य प्रि॒यम॒भिपाथो॑ अश्याम्।
नरो॒ यत्र॑ देव॒यवो॒ मद॑न्ति।
उ॒रु॒क्र॒मस्य॒ स हि बन्धु॑रि॒त्था।
विष्णोः᳚ प॒दे प॑र॒मे मध्व॒ उथ्सः॑।
प्रतद्विष्णु॑स्तवते वी॒र्या॑य।
मृगो न भी॒मः कु॑च॒रो गि॑रि॒ष्ठाः।
यस्यो॒रुषु॑ त्रि॒षु वि॒क्रम॑णेषु।
अधि॑क्षि॒यन्ति॒ भुव॑नानि॒ विश्वा᳚।
प॒रो मात्र॑या त॒नुवा॑ वृधान।
न ते॑ महि॒त्वमन्व॑श्नुवन्ति॥ **2**॥

उभे ते विद्म रजसी पृथिव्या विष्णो देवत्वम्।
परमस्य विथ्से।
विचक्रमे पृथिवीमेष एताम्।
क्षेत्राय विष्णुर्मनुषे दशस्यन्।
ध्रुवासो अस्य कीरयो जनासः।
उरुक्षितिग् सुजनि माचकार।
त्रिर्देवः पृथिवीमेष एताम्।
विचक्रमे शतर्चसं महित्वा।
प्रविष्णुरस्तु तवसस्तवीयान्।
त्वेषग्ग् ह्यस्य स्थविरस्य नाम॥ **3**॥

अतो देवा अवन्तु नो यतो विष्णुर्विचक्रमे।
पृथिव्यास्सप्तधामभिः।
इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्।
समूढमस्य पाग्सुरे।
त्रीणि पदा विचक्रमे विष्णुर्गोपा अदाभ्यः।
ततो धर्माणि धारयन्।
विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे।
इन्द्रस्य युज्यस्सखा॥ **4**॥

तद्विष्णोः परमं पदग् सदा पश्यन्ति सूरयः।
दिवीव चक्षुराततम्।

तद्विप्रा॑सो विप॒न्यवो॑ जागृ॒वाग्ं स॒स्समि॑न्धते।
विष्णो॒र्यत्प॑र॒मं प॒दम्।
पर्या॑प्त्या॒ अन॑न्तरायाय॒ सर्व॑स्तोमोऽति रा॒त्र
उ॑त्त॒ममह॑र्भवति॒ सर्व॒स्याप्त्यै॒ सर्व॑स्य॒ जित्यै॒
सर्व॑मे॒व तेना॑प्नोति॒ सर्वं॑ जयति॥ **5**॥

**॥ इति विष्णुसूक्तं समाप्तम्॥**

श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीसूक्तम् ॥

There could be more variations than those mentioned here.

हिर॑ण्यवर्णां॒ हरि॑णीं सुव॒र्णर॑ज॒तस्र॑जाम्।
[हिर॑ण्यवर्णां॒ हरि॑णीं सु॒वर्ण॑रज॒तस्र॑जाम्।]
[हिर॑ण्यवर्णां॒ हरि॑णीं सु॒वर्ण॑रजत॒स्रजाम्।]
च॒न्द्रां हि॒रण्म॑यीं ल॒क्ष्मीं॒ जात॑वेदो म॒ आव॑ह॥ 1॥
[च॒न्द्रां॒ हि॒रण्म॑यीं ल॒क्ष्मीं॒ जात॑वेदो म॒माव॑ह॥ 1॥]
[च॒न्द्रां॒ हि॒रण्म॑यीं ल॒क्ष्मीं॒ जात॑वेदो म॒ आव॑ह॥ 1॥]

तां म॒ आव॑ह॒ जात॑वेदो ल॒क्ष्मीमन॑पगा॒मिनी᳚म्।
यस्यां॒ हिर॑ण्यं वि॒न्देयं॒ गामश्वं॒ पुरु॑षान॒हम्॥ 2॥

अ॒श्व॒पू॒र्वां र॑थम॒ध्यां ह॒स्तिना॑द प्र॒बोधि॑नीम्।
श्रियं॑ दे॒वीमुप॑ह्वये॒ श्रीर्मा॑ दे॒वीर्जु॑षताम्॥ 3॥

कां॒ सो॒स्मि॒तां हिर॑ण्यप्राकारामा॒र्द्रां ज्वल॑न्तीं तृ॒प्तां त॒र्पय॑न्तीम्।
प॒द्मे॒ स्थि॒तां प॒द्मव॑र्णां॒ त्वामि॒होप॑ह्वये॒ श्रियम्॥ 4॥

च॒न्द्रां प्रं॑भा॒सां यशं॑सा॒ ज्वलं॑न्तीं॒ श्रियं॑ लो॒के दे॒वजुं॑ष्टामुदा॒राम्।
तां प॒द्मनें॑मीं॒ शरं॑णम॒हं प्रपं॑द्येऽल॒क्ष्मीर्मे॑ नश्यतां॒ त्वां वृं॑णे॥ **5**॥
[तां प॒द्मिनीं॑मीं॒ शरं॑णम॒हं प्रपं॑द्येऽल॒क्ष्मीर्मे॑ नश्यतां॒ त्वां वृं॑णे॥ **5**॥]

आ॒दि॒त्यवं॑र्णे॒ तप॒सोऽधिं॑जा॒तो वन॒स्पति॒स्तवं॑ वृ॒क्षोऽथ बि॒ल्वः।
तस्य॒ फलां॑नि॒ तप॒सा नुं॑दन्तु मा॒यान्तं॑रा॒याश्चं॑ बा॒ह्यां॑ अल॒क्ष्मीः॥ **6**॥

उपैं॑तु॒ मां दें॑वस॒खः की॒र्तिश्च॒ मणिं॑ना स॒ह।
प्रा॒दु॒र्भू॒तोऽस्मिं॑ राष्ट्रे॒ऽस्मि॒न् की॒र्तिमृ॑द्धिं ददा॒तु मे॥ **7**॥
[प्रा॒दु॒र्भू॒तोऽस्मिं॑ राष्ट्रे॒ऽस्मि॒न् की॒र्तिमृं॑द्धिं द॒दातुं॑ मे॥ **7**॥]
[प्रा॒दु॒र्भू॒तोऽस्मिं॑ राष्ट्रे॒ऽस्मिन् की॒र्तिमृद्धिं॑ ददा॒तु मे॥ **7**॥]

क्षु॒त्पिं॑पा॒सामं॑लां ज्ये॒ष्ठा॒म॒ल॒क्ष्मीर्नां॑शया॒म्यहम्।
[क्षुत्पिं॑पा॒सामं॑लां ज्ये॒ष्ठाम॒लक्ष्मीर्नां॑शया॒म्यहम्।]
अभूं॑ति॒मसं॑मृद्धिं॒ च॒ सर्वां॒ निर्णुं॑द मे॒ गृहात्॥ **8**॥

ग॒न्ध॒द्वा॒रां दुं॑राध॒र्॒षां॒ नि॒त्यपुं॑ष्टां करी॒षिणी᳚म्।
[गन्धं॑द्वा॒रां दुं॑राध॒र्॒षां॒ नि॒त्यपुं॑ष्टां करी॒षिणी᳚म्।]
ई॒श्वरीग्ं॑ सर्व॑भूता॒नां॒ तामि॒होपं॑ह्वये॒ श्रियम्॥ **9**॥
[ईश्वरीग्ं॑ सर्व॑भूता॒नां॒ तामि॒होपं॑ह्वये॒ श्रियम्॥ **9**॥]

मनं॑सः॒ काम॒माकूं॑तिं वा॒चस्स॒त्यमं॑शीमहि।
प॒शू॒नां रू॒पमन्नं॑स्य॒ मयि॒ श्रीश्श्रं॑यतां॒ यशं॑ः॥ **10**॥

क॒र्दमे॑न प्र॑जाभू॒ता॒ म॒यि॒ सं॑भ॑व क॒र्दम।

[क॒र्दमे॑न प्र॒जा॒भू॒ता॒ म॒यि॒ सं॑भ॑व क॒र्दम।]

श्रियं॑ वा॒सय॑ मे कु॒ले॒ मा॒तरं॑ पद्म॒मालि॑नीम्॥ **11**॥

[श्रियं॑ वा॒सय॑ मे कु॒ले मा॒तरं॑ पद्म॒मालि॑नीम्॥ **11**॥]

आप॑ः सृ॒जन्तु॑ स्नि॒ग्धा॒नि॒ चिक्ली॒त व॑स मे॒ गृहे।

[आप॑ः सृ॒जन्तु॑ स्नि॒ग्धा॒नि चिक्ली॒त व॑स मे॒ गृहे।]

नि च॑ दे॒वीं मा॒तर॒ं श्रियं॑ वा॒सय॑ मे कु॒ले॥ **12**॥

आ॒र्द्रां पु॒ष्करि॑णीं पु॒ष्टिं॒ पि॒ङ्ग॒ळां प॑द्ममा॒लिनीम्।

च॒न्द्रां हि॒रण्म॑यीं ल॒क्ष्मीं॒ जात॑वेदो म॒ आव॑ह॥ **13**॥

आ॒र्द्रां य॒ः करि॑णीं य॒ष्टिं॒ सु॒व॒र्णां हे॑ममा॒लिनीम्।

सू॒र्यां हि॒रण्म॑यीं ल॒क्ष्मीं॒ जात॑वेदो म॒ आव॑ह॥ **14**॥

तां म॒ आव॑ह॒ जात॑वेदो ल॒क्ष्मीमन॑पगा॒मिनी᳚म्।

यस्यां॒ हिर॑ण्यं॒ प्रभू॑तं॒ गावो॑ दा॒स्योऽश्वा᳚न् वि॒न्देयं॒ पुरु॑षान॒हम्॥ **15**॥

[यस्यां॒ हिर॑ण्यं॒ प्रभू॑तं॒ गावो॑ दा॒स्योऽश्वान्॑ वि॒न्देयं॒ पुरु॑षान॒हम्॥ **15**॥]

पद्मप्रिये पद्मिनि प॑द्महस्ते॒ पद्मालये पद्मदळा॑यता॒क्षि।

विश्वप्रिये विष्णुमनो॑ऽनुकू॒ले॒ त्वत्पा॑दप॒द्मं म॑यि॒ सन्नि॑धत्स्व॥ **16**॥

श्रियै॑ जा॒तश्रि॑य॒ आनि॑र्याय॒ श्रियं॒ वयो॑ जनि॒तृभ्यो॑ ददातु।

श्रियं॒ वसा॑ना अमृत॒त्वमा॑य॒न् भव॑न्ति स॒द्यस्समि॒धा मि॒तध्यू॑न्॥ **17**॥

[श्रियं॒ वसा॑ना अमृत॒त्वमा॑य॒न् भव॑न्ति स॒द्यस्सवि॒ता वि॒दध्यू॑न्॥ **17**॥]

श्रियं॑ एवैनं॑ तच्छ्रि॒यामाद॑धा॒ति।
सन्ततमृचा वषट्कृत्यं सन्धत्तं सन्धीयते प्रजं॑या प॒शुभिः॑।
य ए॒वं वे॒द॥ **18**॥

ओं म॒हा॒दे॒व्यै चं॑ वि॒द्महे॑ विष्णुप॒त्न्यै चं॑ धीमहि।
तन्नो॑ लक्ष्मीः प्रचो॒दया॑त्॥ **19**॥

**॥ इति श्रीसूक्तं समाप्तम्॥**

श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ भूसूक्तम् ॥

भूमि॑र्भू॒म्ना द्यौर्व॑रि॒णाऽन्तरि॑क्षं महि॒त्वा।
उ॒पस्थे॑ ते देव्यदिते॒ऽग्निम॑न्ना॒दम॒न्नाद्या॒याऽऽद॑धे।
आऽयङ्गौः पृश्नि॑रक्रमी॒ दस॑नन्मा॒तर॒ं पुन॑ः।
पि॒तर॑ं च प्र॒यन्थ्सुव॑ः।
त्रि॒ग्ं॒ शद्धाम॒ विरा॑जति॒ वाक्प॑त॒ङ्गाय॑ शिश्रिये।
प्रत्य॑स्य वह॒ द्युभि॑ः।
अ॒स्य प्रा॒णाद॑पान॒त्य॑न्तश्च॑रति रोच॒ना।
व्य॑ख्यन् महि॒षः सुव॑ः।
यत्त्वा᳚ क्रु॒द्धः प॑रो॒वप॑ म॒न्युना॒ यदव॑र्त्या।
सु॒कल्प॑मग्ने॒ तत्तव॒ पुन॒स्त्वोद्दी॑पयामसि।
यत्ते॑ म॒न्युप॑रोप्तस्य पृथि॒वीमनु॑ दध्व॒से।
आ॒दि॒त्या विश्वे॒ तद्दे॒वा वस॑वश्च स॒माभ॑रन्॥ 1॥

मे॒दिनी॑ दे॒वी व॒सुन्ध॑रा स्या॒द्वसु॑धा दे॒वी वा॒सवी᳚।
ब्र॒ह्म॒व॒र्च॒सः पि॑तॄणाग् श्रोत्र॒ं चक्षु॒र्मन॑ः।
दे॒वी हिर॑ण्यगर्भिणी दे॒वी प्रसू॒वरी᳚।
सद॑ने स॒त्याय॑ने सीद।
स॒मु॒द्रव॑ती सावि॒त्री हनो॑ दे॒वी म॒ह्यङ्गी᳚।

[स॒मु॒द्रव॑ती सावि॒त्री ह॒नो॑ दे॒वी म॒ह्यंगी॑ँ। ]
म॒होधर॑णी म॒होध्य॑तिष्ठाः शृ॒ङ्गे शृ॑ङ्गे य॒ज्ञे य॑ज्ञे विभी॒षिणी॑ँ।
[म॒हीधर॑णी म॒होव्यधि॑ष्ठाः शृ॒ङ्गे शृ॑ङ्गे य॒ज्ञे य॑ज्ञे विभी॒षिणी॑ँ।]
इन्द्र॑पत्नी व्या॒पिनी॑ सु॒रस॑रिदि॒ह।
वा॒यु॒मती॑ जल॒शय॑नी श्रि॒यंधा॒ राजा॑ स॒त्यन्धो॒ परि॑मेदिनी।
श्वो॒परि॑धत्तं गाय।
वि॒ष्णु॒प॒त्नीं म॑हीं दे॒वीं मा॒ध॒वीं मा॑धव॒प्रियाम्।
लक्ष्मी॑ँ प्रि॒यस॑खीं दे॒वीं न॒मा॒म्यच्यु॑त व॒ल्लभाम्।
ओं ध॒नु॒र्ध॒रायै॑ वि॒द्महे॑ सर्वसि॒द्ध्यै च॑ धीमहि।
तन्नो॑ धरा प्रचो॒दया॑ँत्॥ 2॥

शृ॒ण्वन्ति॑श्रो॒णाम॒मृत॑स्य गो॒पाम्।
पुण्या॑मस्या॒ उप॑शृणोमि॒वाच॑ँम्।
म॒हीं दे॒वीं विष्णु॑पत्नीमजू॒र्याम्।
प्र॒तीचीं॑ मेनाग्ं ह॒विषा॑ यजामः।
त्रे॒धा विष्णु॑रुरुगा॒यो विच॑क्रमे।
म॒हीं दिवं॑ पृथि॒वीम॒न्तरि॑क्षम्।
तच्छ्रो॒णैति॒ श्रव॑ इ॒च्छमा॑ना।
पुण्य॒ग्ग्श्लोकं॒ यज॑मानाय कृण्व॒ती॥ 3॥

॥ इति भूसूक्तं समाप्तम्॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ नीळासूक्तम् ॥

नी॒ळां दे॒वीग्ं शर॑णम॒हं प्रप॑द्ये सु॒तर॑सि तरसे॒ नम॑ः।
गृ॒णा॒हि॒।
घृ॒तव॑ती सवि॒तराधि॑पत्यै॒ः पय॑स्वती॒ रन्ति॒राशा॑नो अस्तु।
ध्रु॒वा दि॒शां विष्णु॑प॒त्न्यघो॑रा॒ऽस्येशा॑ना॒ सह॑सो॒ या म॒नोता᳚।
बृह॒स्पति॑र्माति॒रिश्वो॒त वा॒युस्स॑न्धुवा॒ना वाता॑ अ॒भि नो॑ गृणन्तु।
वि॒ष्ट॒म्भो दि॒वो ध॒रुण॑ः पृथि॒व्या अ॒स्येशा॑ना॒ जग॑तो॒ विष्णु॑पत्नी।
ओं म॒हा॒दे॒व्यै च॑ वि॒द्महे॑ विष्णुप॒त्न्यै च॑ धीमहि।
तन्नो॑ नीळा प्रचो॒दया᳚त्॥

॥ इति नीळासूक्तं समाप्तम् ॥